M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 407

Title: Nyaya Shastra

407

न्यायशास्त्र

२	Nyāya Shāstra	Title
		Author
	अनुमितिपरामर्श-	Editor
	कार्यकारणभाव	Year, Vols.
		Publisher
407		Remarks

407

नामस्मास्त

॥ श्रीगणेशाय नमः ॥ श्रीदेव्यै नमः । परामर्शं विनाऽनुमित्यनुदयात् अनुमितिं प्रति परा-
मर्शो हेतुरिति सिद्धान्तः ॥ तत्र धूमपरामर्शसत्त्वेऽप्यनुमित्यनुदयात् पर्वतोद्देश्यकवह्न्या-
दिविधेयकानुमितिं प्रति पर्वतादिविशेष्यकवह्न्यादिव्याप्यधूमादिप्रकारकनिश्चयो हे-
तुरित्येवं कार्यकारणभावो विशिष्य कल्प्यते नापि। अस्तु वह्निव्याप्यालोकवान् पर्वत
इति परामर्शादपि पर्वतो वह्निमानित्यनुमितेरुदयात् तत्र धूमपरामर्शहेतुताया व्यभि-
चार इति वाच्यं तादृशव्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटौ धूमलि-
ङ्गकत्वस्य निवेशात्। तत्र धूमलिङ्गकत्वं न धूमपरामर्शजन्यत्वं। धूमजन्यतावच्छेदकको-
टौ स्वजन्यत्वनिवेशे आत्माश्रयप्रसंगात् एवं च धूमलिङ्गकत्वं नाम विशेषतः तादृशज्ञानि-
सिद्धिः धूमपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेन विवक्षितं वाच्यं तत्स्वरूपस्याऽऽलोक- १

वेशात् धूमपरामर्शद्विवह्निलक्षणालक्षणायामालोकलिङ्गकपरामर्शजन्यानुमितौ न व्यभिचार इत्या-
हुः। तदसत् तथा सति धूमपरामर्शद्वितीयक्षणोत्पन्नानुमितेर्धूमपरामर्शजन्यतावच्छेदकाना-
क्रान्तत्वप्रसंगात् तृतीयक्षणस्य स्वाधिकरणप्रथमक्षणध्वंसाधिकरणत्वेन तादृशद्वितीयक्षण-
स्य तद्ध्वंसाधिकरणत्वस्य सत्त्वात् न च स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षण-
ध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वरूपमव्यवहितोत्तरत्वं वक्तव्यं तथा
सति नापदोषत्वानुपपत्तिः। तत्र स्वाधिकरणप्रथमक्षणध्वंसाधिकरणत्वेन तादृशद्वितीयक्ष-
णस्य तद्ध्वंसाधिकरणत्वेन तादृशतृतीयक्षणस्य तद्ध्वंसाधिकरणत्वस्य तृतीयक्षणे सत्त्वादिति वा-
च्यं तथापि अपेक्षाबुद्ध्यालोकधूमपरामर्शस्य तृतीयक्षणस्थायितया तद्द्वितीयक्षणोत्पन्नानु-
मितेरसंग्रहप्रसंगात् स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्ष-

स्पर्शसाधिकरणग्रहण धूमानधिकरणत्वे सति स्वाधिकरणग्रहणधूमसाधिकरणग्रहणत्वं व्यतिमत्वं च
व्यवहितोत्तरत्वेनोद्धूमपरामर्शोत्पत्तीपत्तेः

णधूमानधिकरणत्वे सति स्वाधिकरणग्रहणधूमसाधिकरणत्वस्य चैव वा व्यवहितोत्तरत्वं वा व्याप्त्या
मतिधूमपरामर्शं प्रति वह्निमत्त्वाणान्यवान्नालिङ्गकपरामर्शजन्यानुमितौ व्यभिचारस्योद्धारस्य
चानइति दीधितिकाराः। मुस्थित्वे धूमाणां त्वन्यानुमितेः धूमपरामर्शधूमसाधिकरणीभूतत्वलाय
णधूमानधिकरणीभूतत्वं तावत्त्वाणान्यस्य तथा नासंग्रहः। एवमन्यत्रापीत्याहुः। तदसत्। वह्निपदं
धूमपरामर्शसामान्यपरं तत्तद्धूमपरं वा नाद्यः। सर्वानुमितेर्वह्निमत्त्वप्रसंगस्य दुर्वारत्वात्। न तत्तद्धूमपरामर्शधूमसा
धिकरणतया तत्तद्धूमसामानाधिकरण्यस्यानुमितौ जनकतावच्छेदकाप्रसिद्धेः। नान्त्यः। तत्तत्व्य
क्तिभेदेनानुमितिपरामर्शयोः कार्यकारणभावे तदनुपपत्तेः कल्पकतया तत्तद्व्यक्तित्वावच्छि
न्नं प्रति तत्तद्व्यक्तित्वेनैव हेतुत्वमस्तु किमव्यवहितोत्तरत्वनिवेशेनेति न किंचिदेतत्। कचित्तु नु
।स्वसमानाधिकरणस्वहेतुप्रागभावतिरोगित्वकालिकविशेषणतापतत्त्वतयसंबंधे

कपरामर्शजन्यानुमितेरपि तादात्म्येन तत्संबंधेनोत्पत्तौ तद्धूमपरामर्शत्वेन तत्तद्धूमपरामर्शहेतु
तायां व्यभिचारोद्धार इति वाच्यम्। स्वाधिकरणीभूतक्षणवृत्तित्वमेव स्वसंबंधश्च। स्वाधिकरणत्वं च का
लिकविशेषणताविशेषसंबंधेन ईश्वरस्यैव नित्यतया कालिकसंबंधेनावच्छिन्नाधारताया ईश्व
रानुमितौ धूमपरामर्शहेतुतायां व्यभिचार इत्याहुः। तदपि न समीचीनमात्मनाति। जीवनयोनियत्ने
प्रमाणाभावात् न च जीवनयोनियत्नास्वीकारे प्राणपंचकसंचारानुपपत्तिरिति वाच्यम्। अदृष्ट
वदात्मसंयोगबलादेव प्राणपंचकसंचारोपपत्तेः। न च जीवनयोनियत्नास्वीकारे सर्वदात्म
समवेतोत्पत्तिरिति वारणाय आत्ममनस्त्वावच्छिन्नं प्रति आत्मत्वेन हेतुताया मितरकारण
सहकारित्वं कल्पनीयं तस्वीकारे सर्वदैवापत्त्यादशापत्यसंभावनतत्तेतरकारणसहक
ारीच्छाकल्पनादिति वाच्यम्। मनतत्परिस्पंदप्रवत्परमाणुसंयोगादेः सर्वदात्मनिस्वीकारेण।

ममापि तत्रेतरकारणसहकारित्वस्याकल्पनात्। केचित्तु स्वहेतिप्रागभावप्रतियोगित्वविशि
ष्टं यत्स्वसामानाधिकरण्यं तद्विशिष्टं यत्स्वहेतिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नधूमपरामर्श
नाशनिष्ठप्रतियोगितावच्छेदकताकत्वेदाधिकरणवृत्तितत्क्षणोत्पत्तिकत्वं तेन संबंधेन तथा
विधत्रितयसंबंधेन वा धूमपरामर्शवत्त्वमेव धूमलिंगकत्वं त्वालोकपरामर्शद्वितीयक्षण॥
स्य स्वहेतिप्रागभावप्रतियोगित्वसंबंधेनातीतधूमपरामर्शनाशावच्छिन्नयाताज्ञदानावत्व
तत्क्षणोत्पन्नालोकपरामर्शजन्यानुमितितावत्त्वेदाधिकरणक्षणोत्पत्तिकत्वघटितत्रि
तयसंबंधेन धूमपरामर्शाच्चानावन्धूमलिंगकत्वानावात्वमिति चारः। न चालोकपरामर्श॥
द्वितीयक्षणस्यापि स्वहेतिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नधूमपरामर्शनाशालोकपराम ५
र्शद्वितीयक्षणोन्नयनिष्ठावच्छेदकताकत्वेदवच्छिन्नयात्संबंधावच्छिन्नधूमपरामर्शनतानिष्ठावच्छेद

कताकत्वेदवच्छेन तत्क्षणोत्पन्नानुमितौ धूमपरामर्शहेतुतायां व्यभिचार इति वाच्यं स्वावच्छि
प्रतियोगिकत्वस्वनिरूपितधर्मावच्छिन्नप्रतियोगिताकाभावान्यसंबंधेन प्रतियोगितावच्छेदकवत्त्वे
दकत्ववत्त्वविशेषणचात्रानुपपत्तिर्जयेशोपाध्यायैरुक्तः। तदपि न मनोहरं एतादृशधूमलिंगकत्व
स्य धूमपरामर्शजन्यतावच्छेदककोटौ निवेशे गौरवान्न चान्यथानुपपत्त्या तथाविधगौरवं न
दोषायेति वाच्यं प्रकारान्तरस्यानुपदं वक्ष्यमाणत्वात्। अत्राहुः। हेतुतावच्छेदकविषयतामते
वैरूप्यलाघवात्तस्माद्ध्यानावदहेतिरूपव्याप्तिविशिष्टवत्तावगाहिनी च यत्र स्वरूपपरामर्श
त्वेनानुमितिं प्रति हेतुतायां पर्वतो द्रव्यकवह्निविधेयकानुमितिं प्रत्युपरिवक्ष्यमाणाववदहेतिव
रूपव्याप्तिविशिष्टवत्ताभिषयत्वेनाहेतुत्वकल्पने चालोकलिंगकपरामर्शजन्यानुमितौ धूमलिं
गकपरामर्शहेतुतायां व्यभिचारः। तत्राप्यनुमितेः पूर्वं वह्निनावावदहेतिव विशिष्टावगाहित्वा

लौकपरामर्शस्य सत्वात्॥ अथ साध्याभाववद्वृत्तित्वविशिष्टवत्तावगाहिनिश्चयत्वेन हेतुत्वमते
पिपर्वते समवायादिसंबंधेन संयोगसंबंधावच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभा
ववद्वृत्तित्वविशिष्टत्वमस्य निर्णयसत्वे संयोगसंसर्गकपर्वतोद्देश्यकवह्निविधेयकानुमित्या
पत्तिर्न त्वत्रापत्तिः। यत्संबंधावच्छिन्नसाध्याभाववद्वृत्तित्वादेतौऽवगाहित्वयज्ज्ञानं तेन संबंधेन
तदभावावगाहित्वं ज्ञानादनुमितेरानुतविकत्वादिति संयोगसंबंधावच्छिन्नसंयोगसंबंधावच्छिन्न
प्रतियोगिताकवन्ह्यभाववद्वृत्तित्वविशिष्टविशिष्टायाः संयोगसंबंधावच्छिन्नप्रकारताशालि
निर्णयत्वेन संयोगसंसर्गकवह्निविधेयकानुमितिं प्रति हेतुत्वकल्पनस्यावश्यकतया अत्र
समवायसंबंधावच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभाववद्वृत्तित्वविशिष्टसम ६
वायसंबंधावच्छिन्नप्रकारताशालिनिर्णयादनुमितिस्तत्र संयोगसंबंधावगाहिपरामर्शाद्धेतुता

यां व्यभिचारस्योद्वारतया तत्संबंधावगाहिपरामर्शजन्यानुमितौ उपदर्शितनियमसंबंधेन तत्संबंधा
वगाहिपरामर्शत्वनिवेशस्यावश्यकत्वापत्तिरिति चेन्न न तत्संबंधावच्छिन्नतदभाववद्वृत्तित्वं तदभा
ववन्निरूपिततत्संबंधतावत्तया संयोगसंसर्गकवह्निविधेयकानुमितिं प्रति वन्ह्यभावव
न्निरूपितसंयोगाभाववद्विशिष्टनिष्ठायाः संयोगसंबंधावच्छिन्नप्रकारताशालिनिर्णयत्वेन हेतु
त्वेनैव कल्प्यते तदेवोपदर्शितस्यातो व्यभिचारवारणार्थं तत्संबंधावगाहिपरामर्शजन्यतावच्छे
दककोटौ उपदर्शितनियमसंबंधेन तत्संबंधावगाहिपरामर्शत्वनिवेशः तदेवं न। किंतु स्वा
वच्छेदकावच्छिन्नं च स्वनिरूपितविषयतानिरूपितावन्निष्ठविषयतानिरूपितत्वैतद्द्वितय
संबंधेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसांसर्गिकविषयताविशिष्टायाः प्रतियोगितासंबं ×बंधावच्छि ३×२
विषयतानिरूपिताधिकरणविषयतानिरूपितातावद्विषयतानिरूपितसंयोगसंबंधावच्छि

त्रप्रतियोगितासंबंधावच्छिन्नवह्निप्रकारताशालिनिर्णयत्वेन संयोगसंसर्गकवह्निविधेयकानु-
मितौ हेतुत्वस्य कल्पनायत्तया तत्र व्यभिचारसत्त्वेन परामर्शजन्यतावच्छेदककोटावुपदर्शितत्रि-
तयसंबंधेन परामर्शवत्त्वस्य निवेशस्यानन्तत्वात्तत्तत्संबंधत्वेन संबंधतावच्छेदकतानानंगीका-
रात्तु स्वपरामर्शनिष्ठसामानाधिकरण्यसंबंधेन वह्निविधेयकानुमितित्वनिष्ठतानिरूपणसंबंधेन स्व-
परामर्शहेतुत्वं कल्प्यते न चैवमपि व्यभिचारः कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधि-
करणे कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताककारणाभावसत्त्वस्यैव व्यभिचारपदा-
र्थत्वात् प्रकृते तु तादृशसंबंधेनानुमित्यधिकरणे स्वपरामर्शे स्वपरामर्शनिष्ठसत्त्वेन व्य-
भिचाराभावात् एतेनालोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वपरामर्शजन्यतावच्छे- ४
दककोटावुपदर्शितत्रितयसंबंधेन स्वपरामर्शविशिष्टत्वनिवेशस्यावश्यकतया परामर्शजन्यता-

वच्छेदककोटावनुमितित्ववह्निविधेयकत्वादीनां निवेशे प्रयोजनाभावः न च कार्यतावच्छेदककोटौ
यानुमितित्वानिवेशे स्वपरामर्शाव्यवहितोत्तरक्षणोत्पन्नघटात्मसंयोगव्यभिचारः तादृश-
संयोगस्यापि उपदर्शितत्रितयसंबंधेन स्वपरामर्शवत्तया तदधिकरणोत्पन्नघटे स्वपरामर्शाना-
वच्छिन्नत्वात् कार्यतावच्छेदकविशेषाधिकरणे अव्यवहितपूर्वक्षणावच्छेदेन कारणाभावस्यैव
व्यभिचारपदार्थत्वात् तत्र च विशेषाधिकरणत्वं यत्र वैशिष्ट्यनियामकसामानाधिकरण्यघटको-
त्पत्तिविशिष्यविशेषणसंबंधाभ्यां विशिष्यविशिष्याणोनयसंबंधस्य गुणकर्मान्यत्वविशिष्टसत्ताधि-
करणत्वं तच्च एवं तत्र सामानाधिकरण्यघटकोत्पत्तिविशेष्यविशेषणसंबंधाभ्यां विशिष्यविशेष-
णानयसंचारात् प्रकृते तु परामर्शविशिष्टनियामकसामानाधिकरण्यघटकोत्पत्तिसमवाया-
संबंधाभ्यां परामर्शतद्विशिष्ययोरधिकरणत्वे यत्र तत्रैव सामानाधिकरण्यसंबंधेन स्वपरा-

पक्षविशिष्टाधिकरणत्वं वह्नेस्तेन समवायेन घटे धूमपरामर्शाभावान्न व्यभिचारः तत्र धूमपरा
मर्शविशिष्टाधिकरणत्वं चेत्तन्न तद्देवतात्वेन पदात्मसंयोगसमवायव्यभिचारः न च समानाधि
करणसंबंधेन धूमपरामर्शविशिष्टत्वस्य धूमपरामर्शकार्यतावच्छेदककोटौ निवेशो धूमपरा
मर्शविशिष्टतायत्त्वेनान्यत्रानुमितेरसंग्रहः॥ तद्वृत्तीयत्त्वेन धूमपरामर्शानां देनतत्त्वेनान्यत्रा
नुमितेस्तद्देशीयत्वाभावादिति धूमपरामर्शोपलक्षितं व्यक्तिधूमपरामर्शो हेतुः। तथा च व्यभिचारा
न्न दत्तस्य एवेति वाच्यं। धूमपरामर्शकार्यतावच्छेदककोटौ ज्ञानत्वस्य निवेशात्तत्र विनिगम
नाविरहेणानुमितित्वादेर्निवेश इति वाच्यं। अनुमितित्वा॰ र्विनिवेशे वह्निव्याप्यत्वानावप्यं।
लिंगतिवह्निव्याप्यवत्तानिर्णयस्यापि हेतुतांतरकल्पने एवं निर्वाहात् तादृशमन्मातत्व एककार्यका ९
रणताकल्पनेनैवोपपत्तेः॥ अथ वह्निविधेयकत्वादेः परामर्शजन्यतावच्छेदककोटाव

विशेषेयत्र घटव्याप्यवान् वह्निव्याप्यधूमवांश्चेति समूहालंबनात्मकः परामर्शः। अथ वेदंज्ञा
नं धूमाभाववति धूमप्रकारकमित्यप्रामाण्यज्ञानानंतरं तत्रत्यपरामर्शद्वितीयक्षणेऽन्यत्र घटा
नुमितेर्व्यभिचारवारणाय तादृशाप्रामाण्यज्ञानव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगि
ताकाभावाः धूमपरामर्शजन्यतावच्छेदककोटौ निवेशनीयाः। तथा च तादृशाभावकूटं निवे
शप शे कार्यकारणभावकल्पने गौरवं। मन्मते तु तत्तद्वह्निविधेयकानुमितिं प्रति तत्तद्धूमप
रामर्शकार्यतावच्छेदकावच्छिन्नस्य धूमपरामर्शं विनाऽनुदयान्न व्यभिचारः। नावेनतत्रावश्या
माण्यज्ञानाभावाः धूमपरामर्शजन्यतावच्छेदककोटौ न निवेशनीया इति महल्लाघव
मिति वाच्यं एवं अप्रामाण्यज्ञानाभावानुगतधर्मावच्छिन्नप्रतियोगिताकप्रवानुमितिजन्य
कतावच्छेदककोटौ निवेश×सा×नीयाः न तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावाः न

उत्तरं तु पक्षताविषयपरामर्शव्यवहितेः तथा च वह्निविधेयकत्वादेरपि वैशिष्ट्यगौरवावकाशादित्य
पि निरस्तं॥ धूमपरामर्शकार्यतावच्छेदककोटौ धूमपरामर्शवैशिष्ट्यमपि वेश्यमेवानुमितिपरा
मर्शयोः कार्यकारणभावकल्पनप्रकारस्य दर्शितत्वात् तथानुमितित्वादेर्निवेशानिवेशा
वस्तुकृतविचारस्यासंगतत्वे वेति ध्येयं॥ धूमपरामर्शकालेऽदं ज्ञानं धूमाभाववद्वृत्तिधूमप्रकार
कमित्यप्रामाण्यज्ञानेऽपि पर्वतो वह्निमानित्यनुमितेरुदयात् धूमपरामर्शादिजनकता
वच्छेदककोटौ तथाविधाप्रामाण्यज्ञानाभावो विवक्षणीयः॥ अथ किंसंबंधावच्छिन्नप्रति
योगिताकाप्रामाण्यग्रहाभावस्तत्र विवक्षणीयः न च समवायसंबंधावच्छिन्नप्रतियोगिताका
प्रामाण्यग्रहाभावस्तथा सत्यप्रामाण्यग्रहकालेऽपि तत्संबंधावच्छिन्नप्रतियोगिताकाप्रामा
ण्यग्रहाभावस्य परामर्शेऽपि सत्त्वात् अप्रामाण्यग्रहाभावविशिष्टपरामर्शस्याबाधितत्तया वह्नि ९

विधेयकानुमितेरापत्तेर्वा स्वरैवात्र वैशिष्ट्यमनावसंबंधवृत्तिसामानाधिकरण्यसंबंधावच्छिन्नप्र
तियोगिताकाप्रामाण्यग्रहाभावो निवेशनीय इति वाच्यं तथा सति धूमपरामर्शप्रामाण्यग्रहसमये
धूमपरामर्शान्तरकाले पर्वतो वह्निमानित्यनुमितेरुदयप्रसंगात् तादृशसामानाधिकरण्यसंबंधा
वच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शसत्त्वादिति चेत् स्वविशेष्यत्वस्व
सामानाधिकरण्येतत्संबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्यैवानुमितिजनक
तावच्छेदककोटौ निवेशात्। यत्र चैकधूमपरामर्शेऽप्रामाण्यज्ञानमपरधूमपरामर्शे तत्रापि
तत्रापरधूमपरामर्शस्याप्रामाण्यज्ञानाविशेष्यतया विशेष्यत्वघटितैतत्संबंधावच्छिन्नप्र
तियोगिताकतथाविधाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शस्यासत्तत्तया अनुमित्यनुत्पत्तेर्बा
धकाभावः। एकत्र धूमस्याप्रामाण्यग्रहस्यापरत्र धूमाप्रामाण्यांतरस्य धूमपरामर्शस्य च तद्धर्मांतस्यानुमितिप्र

त्वन्नये सामानाधिकरण्यनिवेशः। अत्र च यद्धर्मधर्मितावच्छेदकीकृत्य सामानाधिकरण्यस्य स्तमेव परा-
मर्शपक्षेऽनुमित्युद्देश्यतावच्छेदकतद्धर्मधर्मितावच्छेदककसामानाधिकरण्यग्रहस्यावच्छिन्नत्व।।
त्वप्रामाणिकत्वात् अनुगतरूपेण धूमपराजनकतावच्छेदककोटौ निवेशनीया।। न च
न त्वनुगततद्धर्मविशिष्टावच्छिन्नत्वतायामनुगतानामनुगमकाभावाद् गौरवात्। अप्रयोजकत्वाद्वेति। एवं
वह्निव्याप्यधूमवानयं पर्वत इत्यादिसंशयकालपर्वतो वह्निमानित्यनुमितेरुद्देश्यत्वादनुमि-
तिजनकतावच्छेदककोटौ निश्चयत्वनिवेशः। तत्र निश्चयत्वं वह्निव्याप्यधूमाद्यन्यतावाप्रका-
रकत्वे सति वह्निव्याप्यधूमादिप्रकारकज्ञानत्वं। संशये धूमाभावस्य प्रकारत्वान् संशयका-
लीनपरामर्शस्य प्रकारकवह्निव्याप्यधूमप्रकारकज्ञानानामसत्वादनुमित्यापत्तेः। विशिष्यतावाद्य १०
मान्यप्रकारतानिरूपिता याह्या। तन्नयत्र वह्निव्याप्यधूमवानयं पर्वत इत्याकारकपरामर्शोत्तरं

इदं ज्ञानं धूमाभावविपरामर्श इव मेयं इति ज्ञानेनानन्तरं परामर्शोत्तरं शब्दानुमित्युत्पत्त्यापत्तिः।। तादृशवि-
शेष्यतासंबंधेन धूमाभावज्ञानस्य घटितत्वात् परामर्शादावनावात् अत्र च वह्निधूमाभावस्य प्रकारताचे-
न धूमाभावप्रकारकवह्निव्याप्यधूमप्रकारकज्ञानस्य सत्त्वादयं कालेऽपि चानन्तरं विरोधिसं-
बंधावच्छिन्नधूमाभावप्रकारताशून्यत्वं कारणतावच्छेदककोटौ निवेशनीयं तत्र च
विशेषितानानंगीकारेण विरोधसंबंधावच्छिन्नधूमाभावप्रकारकताशून्यत्वस्य तत्र सत्त्वा-
त्वादनुमित्युत्पत्तौ बाधकाभाव इति वाच्यं। यत्र संशये न कोटौ विरोधेन ना।।
ना। किंतु वा कोटौ विरोधे दलानन्तरं पर्वतो वह्निमानित्यनुमित्युत्पत्तेः। तद्वि-
रोधसंबंधावच्छिन्नधूमाभावप्रकारताशून्यवह्निव्याप्यधूमप्रकारकज्ञानस्य सत्त्वात् न च व-
ह्निव्याप्यधूमप्रकारकतायां विरोधसंबन्धावच्छिन्नत्वं निवेशनीयमिति वाच्यं। यत्र विरोध।

सबंधावच्छिन्नसंयोगसंबंधेन वह्निव्याप्यधूमवत्तानिर्णयस्य तत्तत्पर्वतो वह्निव्याप्तिमानित्युमि।
त्पत्तेः।विधेयांशस्य संशयकोटिद्वयमध्य एककोटावपि विशेषेण ज्ञानात् तत्तत्पर्वतो वह्नि
मानित्युमित्युत्पत्त्यापत्तेश्च न च तादृशसंशयमानानावच्छिन्नत्वं वाच्यं तादृशसंशयाप्रका।
रकविधेयधर्मावच्छिन्नत्वादिमत्त्वेति प्रत्यक्षपदार्थबाधितिकारत्वेन संगतत्वात् इति चेन्न धर्मिता
वच्छेदकसामानाधिकरण्येनोभयकोटिकसंगादिज्ञानं प्रत्युत्तया।अवच्छेदकावच्छेदेनान्यत
रकोटिकसंगादिज्ञानं संशय इति नियमात्।सामानाधिकरण्येन वह्निव्याप्यधूमवत्ताज्ञाने च्छे
नत्वतायां धर्मितावच्छेदकव्यापकदेशिकविशेषणताविशेषसंबंधावच्छिन्नधूमानावश्य
कारताश्रन्यत्वं निवेशनीयं अवच्छेदकावच्छेदेन वह्निव्याप्यधूमवत्ताज्ञानत्वजताया देशिक ११
विशेषणताविशेषसंबंधावच्छिन्नधूमानावप्रकारताश्रन्यत्वं निवेशनीयं तथाच सामा।

धिकरण्येनोभयकोटिकसंगादिसत्त्वे यत्सामानाधिकरण्येन वह्निव्याप्यधूमवत्ताज्ञानका।
रणतावच्छेदकाक्रांततया तस्मादनुमित्युत्पत्तौ बाधकाभाव।।केचित्तु संशये उभयप्रका
रतानिरूपितैकविशेष्यता संशयत्वेनोभयप्रकारतानिरूपितोभयविशेष्यताप्रत्यमे
वच समुच्चयसंज्ञापार्नेदि।तथावप्रकातअतावप्रकारतानिरूपितवह्निव्याप्यधूमप्रका
रतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वमेव निश्चयत्वं।पर्वतो वह्निमानित्यनु
मितिं प्रति तेन रूपेण हेतुत्वात् न समुच्चयादौ अनुमित्युत्पत्त्यनुपपत्तिः।।इत्याहुः।।तदसत्।तथा।
सति पर्वत एकत्र द्वयमिति रीत्या आलोकाभाववह्निव्याप्यधूमोभयप्रकारकालोका।
भाववान्पर्वतो वह्निव्याप्यधूमवानित्यादिज्ञानादितु मित्युत्पत्तिः।तत्र वह्निव्याप्यधूमप्र
कारतानिरूपितविशेष्यतायाएव आलोकाभावप्रकारतानिरूपितविशेष्यताया तत्र वि

श्रोध्यो॥ठ॥ ॥

१

=
१ः